INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:4(5), April:2021
Online Copy Available: www.ijmer.in
Digital certificate of publication:http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf

# श्री वेङ्कटाचलक्षेत्रमाहात्म्यम्

Dr. Sk. Nagamastanvali
Guest Faculty
Directorate of Distance Education
National Sanskrit University
Tirupati

**वेङ्कटाद्रि समं स्थानं ब्रह्माण्डे नास्ति किञ्चन।**

**वेङ्कटेशसमो देवो न भूतो न भविष्यति।।**

ब्रह्माण्डभाण्डेषु वेङ्कटाद्रेः समानं दिव्यस्थलं कुत्रापि नास्ति। तथैव श्रीवेङ्कटेश्वरस्वामिनः तुल्यः  देव अपि भूतकाले नासीत् भविष्यकाले न भविष्यति इति सुप्रसिद्धं वेङ्कटाचलमाहाम्यं वेदव्यासेनानेकपुराणेषु विवृतम्।

श्रीमहाविष्णुः आदिवराहस्वामिरूपेणावतीर्थं हिरण्याक्षनामकं राक्षसं हत्वा भूदेव्याः रक्षणं कृत्वा तत्रैव स्थितः। अत एव आदिवहारक्षेत्रमिति आदौ उक्तं वेङ्कटाचलक्षेत्रम्। तथैव श्रीनिवासरूपेणावतीर्थं, आकाशराजस्य पुत्र्या पद्मावत्या विवाहानन्तरम् अस्मिन् क्षेत्रे वराहस्वामिनः अनुमत्या अर्चावताररूपेण स्थितः, आश्रितानां भक्तानां पापान् दूरीकृत्य, तेषां वाञ्छाफलसिद्धिं कुर्वन् "कलौ वेङ्कटनायकः" इति प्रसिद्धः।

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:4(5), April:2021
Online Copy Available: www.ijmer.in
Digital certificate of publication:http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf

श्रीवराहपुराणे, आदित्यपुराणे, ब्रह्मपुराणे, ब्रह्माण्डपुराणे, पद्मपुराणे, भविष्योत्तरपुराणे, स्कन्दपुराणे, वामनपुराणे, मार्कण्डेयपुराणे, ब्रह्ममोत्तरखण्डे च वेङ्कटाचलमाहात्म्यं सुष्टुवर्णितम्। तत्र श्रीवराहपुराणे प्रथमभागे, द्वितीयभागे च श्रीवेङ्कटाचलमाहात्म्यं सम्यक् विस्तृतं वर्णितम्। श्रीवराहपुराणे वेङ्कटाचलमाहात्म्ये प्रथमभागे त्रयस्त्रिंश अध्यायादारभ्य द्विषष्ठीतम अध्यायाः सन्ति। द्वितीयभागे दशाध्यायाः सन्ति। आहत्य चत्वारिंशाध्यायेषु वेङ्कटाचलमाहात्म्यं वर्णितम्।

धरावराहदेवोऽपि लोकानुग्रहकाम्यया भूमौ स्थातुं दिव्यं स्थलं बुध्या निश्चत्य अद्भुतं गिरिमानेतुं गरुडं प्रेषयामास। वैनतेय! महासत्त्व! त्वमतिवेगतः गच्छ! गत्वा तु परमं धाम क्रीडाचलमिहानय।

तत्कथमस्तीत्युक्ते - आप्राकृतम्, अमेयं सर्वरत्नमयं, हिरण्मयं, महाशृङ्गं, पञ्चोपनिषदात्मकं पुन्नागचम्पकाशोकतालहिन्तालशोभितं, सुरद्रममुखैः वृक्षैः, अन्यैः काञ्चनरूपकैः शोभितं शुककोकिलहंसकैः पक्षिसंघैश्चश्रवणानन्दजनकमधुरालापसम्भ्रमैः मल्लिकामालतीभिः नन्द्यावर्तादिभिः लताभिः पुष्पिताग्राभिः दिव्यसौरभशालिभिः, सिंहशार्दुलमातङ्गशरभक्रोडवानरैः शोभितं ,गायत्किन्नरङ्कितभिः किन्नरीभिश्च शोभितं अनेकनिर्झराकीर्णं मानसाह्लादकारकं, मुक्तैः नित्यैः कामरूपैः, नानारूपैश्च सेवितं, नारायणगिरिं नाम्ना परमेष्ठिनः क्रीडाद्रिं योजनत्रयविस्तारं, त्रिंशद्योजनमायतं, शेषाकारं, हरेः शेषं सर्वं देहिनां शेषिणं, दिव्याकारं, महापुण्यं, पश्यतां मोक्षदायकं रूपम् एवं गिरिश्रेष्ठं तं नारायणाद्रिं भगवत्परिचरिकैः परिवारैरूपेतं स्कन्धदेशे निधाय काञ्चनप्रभः गरूडः महावेगात्

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:4(5), April:2021
Online Copy Available: www.ijmer.in
Digital certificate of publication:http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf

आजगाम। ततः ससम्भ्रमो वायुरूद्भूत् विहायसि विष्णुवाहनः धुन्वन् वृक्षान् सूर्यकोटिरिव आबभौ। आगतं गरुडं वीक्ष्य हरिः हे खगेश्वर! पर्वतमिह स्थापयेत्थुवाच! गरुडोऽपि तथा स्थापयामास। ततः गिरिं समारुह्य श्वेतपोत्री हरिः स्वामिपुष्करिणीतीरे पश्चिमे पुण्यकानने, स्थितः। कोटिसूर्यसमप्रभे दिव्ये विमले विमाने अनेकरत्नखचितगोपुरायुत शोभिते रत्नस्तम्भसमोपेते श्रीमहामणिमण्डपे वाचामगोचरे सर्वनयनानन्दकारके स्वामिपुष्करिण्याः दक्षिणे तटे विमानमद्ये परात्परः पद्माक्षः श्रीनिवासः देवदेवोऽपि शङ्खचक्रधरः अतिष्ठत्।

अनन्तरे मुनयः सर्वे अगस्त्यादयः हर्षानिविष्टाः योगिनः स्तुतिप्रीतं गम्यं स्तुत्या तदा प्रत्यर्थं तुष्टवुः।

**नमस्ते यज्ञरूपाय यज्ञभोक्त्रे नमो नमः।**

**यज्ञकर्त्रे नमो यज्ञप्रयाय च नमो नमः।।2**

**इद्रादिभिः कृता भगवत्स्तुतिः -**

**ओं नमो वेङ्कटेशाय शेषाद्रिनिलयाय च ।**

**सिंहाचलनिवासाय श्रीमन्नारायणाय च।।**

**केशवाय नमो नित्यम्। वासुदेवाय ते नमः।**

**हृषीकेशाय महते। वामनाय नमो नमः।।3**

**दशरथेन कृता भगवत्सुतिः -**

**ब्रह्मेन्द्रप्रमुखाः सर्वे तपः कुर्वन्ति यत्कृते।**

**त्वदधीना रमा सा तु त्वत्प्रसादाभिकाङ्क्षिणि।।**

**ब्रह्मणा कृता भगवत्स्तुतिः –**

**आसीदग्रे सदेकस्तु स च नारायणः श्रुतः।**

**आपोऽसृजत्ततो वीर्यं विसृष्टं तासु तेन वै।।4**

**तदण्डमभवत्पश्चात् त्वया सृष्टोऽहमीश्वरः।**

**मया सृष्टा प्रजास्सर्वाः सर्वमूलं त्वमेव भो।**

एवं अनेकविधैः स्तोत्रैः भगवन्तं स्तुतिं चकार। श्रीवेङ्कटाचल क्षेत्रम् सर्वपापाक्षयकरं च सर्वं पुण्यविवर्धनं भवेत्। जनाः विशेषेण कलौयुगे ये वाञ्छन्ति अवश्यं वेङ्कटेशः तान् सर्ववपुलसिद्धिः दास्यन्ति। तत्र श्रीवेङ्कटाचले कपिलादिसप्तदशातीर्थे ये जनाः स्नानं कुर्वन्ति तेषा सर्वं पापानि नश्यन्ति एवं सर्वं पुछ्यपूलं भविष्यति।

अस्मिन् पुण्यतमे श्रीवेङ्कटाचलक्षेत्रे पाण्डवाः धर्मपुत्राद्याः कृष्णेन क्लिष्टकर्मणा उपदिष्टाः वेङ्कटाख्यनगोत्तमं समागम्य, क्षेत्रपालाभिरक्षिते कस्मिंश्चत्पुण्यतीर्थे अवसब्दमात्रकं स्नानपानादीन् कुर्वन्तः आसन्। तदाकदाचित् धर्मराजः उत्तमं स्वप्नं ददर्श यस्मात् अस्मिन् महातीर्थे वत्सरमात्रकं स्थितमित्यनेन पुण्येन योगेन क्षीणकल्मषाः भवन्तः युद्धे जयं तथा राज्यं क्रमागतं गमिष्यति इति। तदा प्रभृति तत्तीर्थं पाण्डवतीर्थमिति बुधाः विदुः। भक्ताः विशेषेण

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:4(5), April:2021
Online Copy Available: www.ijmer.in
Digital certificate of publication:http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf

अस्मिन् कलौयुगे भक्त्या वेङ्कटाचलक्षेत्रमागत्य भगवन्तं श्रीनिवासं दर्शयन्ति चेत् तेषां सर्वान् कामान् प्राप्स्यन्ति।

उपयुक्तग्रन्था –

वहारपुराणम् – १.२४

वहारपुराणम् – १-५७

वहारपुराणम् – १-१६

वहारपुराणम् – १-१४

Filename: 29
Directory: C:\Users\DELL\Documents
Template: C:\Users\DELL\AppData\Roaming\Microsoft\Templates\Normal.dotm
Title:
Subject:
Author: Windows User
Keywords:
Comments:
Creation Date: 4/16/2021 4:41:00 PM
Change Number: 5
Last Saved On: 5/2/2021 9:12:00 PM
Last Saved By: Murali Korada
Total Editing Time: 6 Minutes
Last Printed On: 5/4/2021 12:31:00 AM
As of Last Complete Printing
Number of Pages: 5
Number of Words: 1 (approx.)
Number of Characters: 6 (approx.)